Shri Raghunath Temple MSS. Library,
JAMMU

No. ९९९-घ

Title महिम्न:स्तोत्र टीका

Author

Extent २८ Age

Subject स्तोत्रम्

© Dharmartha Trust. Digitized by eGangotri

१८ पत्र

महिम्नः स्तोत्रम् सटीकम्

५५५

© Dharmartha Trust. Digitized by eGangotri

© Dharmartha Trust. Digitized by eGangotri

म॰टी॰ श्रीगणेशायनमः ॐ एवंकिलव्याख्यायते कश्चित्किलगं
१ धर्वराजःकस्यचिद्राज्ञःप्रमदवनकुसुमानिहरन्नासीत् तज्ज्ञा
त्वाचशिवनिर्माल्यलंघनेनमनुष्यचोरस्यांतर्धानादिशक्ति
र्विनंक्ष्यतीत्यभिप्रायेणराज्ञःशिवनिर्माल्यंपथिनिक्षिप्तं तद
प्रतिसंधायगंधर्वराजस्तत्रप्रविशन्नेवकुंठशक्तिर्बभूव त
तश्चशिवनिर्माल्यलंघनेनैवममैतादृशंवैकुंठ्यंइतिप्रणि
धानेनविदित्वापरमकारुणिकंभगवंतंसर्वकामदंतमेवतु
ष्टाव ननुस्तुतिर्नामकथनंतच्चगुणज्ञानाधीनंअज्ञातस्य
कथनासंभवात् तथाचभगवतोगुणानामनंतत्वेनज्ञातुम
शक्यत्वात् कथंतत्कथनरूपास्तुतिरनुरूपाभवेत् अननु
रूपकरणंचोपहासायैवेतियाशंकापनोदनव्याजेनस्वस्या शिव
नोखल्वयंदशेयमापन्नेयभगवंतंस्तोतुमारभे ॐ श्रीगुरवेस्वगो १

© Dharmartha Trust. Digitized by eGangotri

पवर्गयोर्द्दीरं यस्माद्वाञ्जाविलोकनात् यच्चास्या ओक्षणं श्रीदं तं वंदे धरणीधरं १ महिम्नेति हे भगवन् तेतव महिम्नः परं पारं अत्यर्थं अवसानं अविदुषः पुंसः अजानतः पुरुषस्य स्तुतिर्यदि असदृशी स्यात् अननुरूपा अयोग्या भवेत् न तत्तदा ब्रह्मादीनामपि गिरस्त्वयि विषये अवसन्नाः भवेयुः निष्फला भवंति

ॐ महिम्नः पारंते परमविदुषो यद्यसदृशी
स्तुतिर्ब्रह्मादीनामपि तदवसन्नास्त्वयि गिरः

तत्तस्मात्कारणात् न केवलमस्माकमेव स्तुतेरनधिकारत्वं ब्रह्मादेरपि तथैव स्यादित्यर्थः एतेन पूर्वार्धेन स्तुतेरनधिकारत्वं प्रतिपादितं उत्तरार्धेन साधिकारत्वं प्रतिपाद्यते अथैवं कुर्यात्सर्वः समस्तो जनः स्वमतिपरिणामावधि स्वकीयायाः

© Dharmartha Trust. Digitized by eGangotri

म॰टी॰ मत्याः परिणामः परिपाकः स एवावधिर्यथाभवति तथा स्वां
२ गृणन्स्तुवन् अथवा ऽयो ऽनलपनीयो ऽनुग्राह्यो भवति यैवं त घे२
2 र्हि हे हर अस्मिन् स्तोत्रे ममापि एषः परिकरः प्रारंभो निरपवा
द निर्दोष एव १ अतीतेति हे भगवन् पतस्तव महिमा वाङ्मन

अथावाच्यः सर्वः स्वमतिपरिणामावधिगृणन्
ममाप्येष स्तोत्रे हर निरपवादः परिकरः १

सयोः पंथानं अतीत एव वा क्व मनश्च वाङ्मनसी तयोर्वाङ्मनस
योः एतौ किल वाङ्मनसी सर्वार्थाविषयणी ताभ्यामपि तव महि
मा अवधारयितुं परिज्ञातुं न शक्यते न च प्रत्यक्षेणानुमानेन ग
म्यते स कः यं तव महिमानं श्रुतिरपि वेदो ऽपि चकितं अभिधत्ते शिव
भीतभीतं ब्रूते न निश्चयतः कथा अतद्व्यावृत्त्या न तत् अतत् ॥ २

© Dharmartha Trust. Digitized by eGangotri

अतद्रूपा चासौ व्यावृत्तिश्च अतद्व्यावृत्तिस्तया सः इत्थंभूतो महि
मा कस्य स्तोतव्यः अपितु न कस्यापीत्यर्थः तथा कतिविधगुणक
स्य भगवतो कियंतो गुणाः न परिज्ञातुं नशक्यन्ते कस्य विषयः क
स्य गोचरो भगवान् न कस्यापीत्यर्थः एतेन निष्कलस्वरूपेण

अतीतः पंथानं तव च महिमा वाङ्मनसयोरतद्व्यावृत्त्या यं च
कितमभिधत्ते श्रुतिरपि स कस्य स्तोतव्यः कतिविधगु
णः कस्य विषयः पदे त्वर्वाचीने पतति न मनः कस्य न वचः २

क्तेतेरनधिकारत्वं प्रतिपादितं सकलेसायकाग्राह्यमस्तीति प्र
तिपादयन्नाह तु पुनः अर्वाचीने सृष्टिस्थितिप्रलयात्स्या पदे
स्थाने कस्य मनः न पतति वचो वाक् कस्य न प्रसरति अपितु
सर्वेषामपि मनो वचः पतति २ श्रीभगवतो शेष शास्त्रक
र्तृत्व प्रतिपादनाय आम्नायसमुच्चय परिहाराय स्तुवन्नाह मा

© Dharmartha Trust. Digitized by eGangotri

म·टी· पुस्फीतेति हेभगवन्ममस्तुत्यातवतुष्टिर्नास्त्येव किंकुर्वेत
३ स्तथयाचोगिरोनिर्मितेवतःस्तवब्रवतःकथंभूतावाचःमधु
3 स्फीतामधुवत्स्फीताःकोमलाःमाधुर्य्यगुणयुक्ताःसालंका
राःपुनःकथंभूताःपरमंअमृतंपरमामृतस्वरूपास्तत्तथो।
च्यंतेउपचाराद्धूंलसिस्यांतनिष्ठाएतेनकिमुक्तंएवंविधास्त

मधुस्फीतावाचःपरमममृतंनिर्मितवतस्तवब्रह्मन्किंवा
गपिसुरगुरोर्विस्मयपदं ममत्वेतांवाणींगुणकथनपुण्य
नभवतःपुनामीत्यर्थेस्मिन्पुरमथनबुद्धिर्व्यवसिता ३

गीपवर्गीयोनिष्ठावाचोगिरोनिर्मितवतःसुरगुरोरपिवाक्किं
तवविस्मयपदंआश्चर्यस्थानंभवतिअपितुनभवतीत्यर्थः किं
पुनःअस्मदादेःअहोपयेवंतर्हिकथंप्रवृत्तोप्रवर्त्तसे सत्यंतुपुनः शिव
हेपुरमथनअस्मिन्स्तुतिलक्षणेऽर्थेममबुद्धिःइतिकारणात्व्यव ३

© Dharmartha Trust. Digitized by eGangotri

सिताकृतोयमाहतीतिकिं अहंभवतः गुणकथनपुण्येनएतां
आत्मीयांवाणींपुनामि पवित्रीकरोमि ३ तवैश्वर्यमिति आ
त्मस्तुतेः सावकाशत्वं अभिधायत्वं प्रतिपाद्य इदानीं सर्वज्ञत्वं स
र्वकर्तृत्वं प्रति केचित् प्रतिपद्यंते मीमांसादयः तन्मतनिराक
रणाय अनवद्यप्रणामोपन्यासपरेण श्लोकत्रयेण भगवंतं

तवैश्वर्यंयत्तज्जगदुदयरक्षाप्रलयकृत्त्रयीवस्तुव्यस्तं
तिसृषुगुणभिन्नासुतनुषु अभव्यानामस्मिन्वरदरमणी
यामरमणीं विहंतुं व्याक्रोशीं विदधत इहैकेजडधियः ४

नुनादेत्याह हेभगवन् हेवरद यत्तस्तवैश्वर्यं तत् व्यस्तं निक्षिप्तं आ
रोपितं या कासु तिसृषु तनुषु कथंभूतासु गुणभिन्नासु गुणाः स
त्वरजस्तमांसि तैर्विभिन्नाः पृथग्भूता गुणभिन्नाः कथंभूतं तवऐ
श्वर्यं जगदुदयरक्षाप्रलयकृत् त्रयाणां जगतां उदयः उत्पत्तिः र

© Dharmartha Trust. Digitized by eGangotri

म॰टी॰ क्षापरिपालनं प्रलयो नाशश्चेति भगवान्करोतीति पुनः कथंभूतं
४ त्रयीशास्त्रेन वेदत्रयी अथवा ब्रह्मविष्णुरुद्रात्मकस्वरूपं हे भगवन् इह
५ मर्त्यलोके एके जडधियो मंदमतयः पापिष्ठाः मीमांसादयः तवैश्वर्यं
विहंतुं विस्फोटयितुं निराकर्तुं व्याक्रोशीं निंदां विदधते कुर्वंति कथं
भूतां अभव्यानां पापिष्ठानां रमणीयां मनोरमां पुनः कथंभूतां अस्मि

किमीहः किंकायः स खलु किमुपायस्त्रिभुवनं
किमाधारो धाता सृजति किमुपादान इति च ॥ ॥

न्सर्वज्ञादिगुणोपेते तवैश्वर्ये अरमणीं ४ इदानीं तामेव व्याक्रो
शीं प्रकटयन्नाह खलु निश्चितं स धाता स कर्ता त्रिभुवनं सृजति स धा
ता किमीहः सन् त्रिभुवनं सृजति भुवनजनने का ईहा चेष्टा तथा किंका
यः किंशरीरः सन् सृजति तथा किमुपायः सन् सृजति त्रिभुवनं किं उपा शिव
दानं किं कारणं किं निमित्तं अयमिति कुतर्कैः कांश्चिन्हतधियः मंदम ४

© Dharmartha Trust. Digitized by eGangotri

तीन्मुखरयति वाचालयति किमर्थं जगतो मोहाय विप्रतारणाय
नरकगमनाय च कथंभूतः कुतर्कः त्वयि विषये अनवसरदुःस्थः
दुर्बलः अति अनवसरदुःस्थः कथंभूते त्वयि अतर्क्यैश्वर्ये अ
चिंत्यमहिम्नि यदुक्तं इच्छया कुरुते देहे मिच्छया विनतुर्भवेत् भग
वान् क्रीडते लोके बालक्रीडनकैरिव ५ अजन्मानइति हेभगव

अतर्क्यैश्वर्ये त्वय्यनवसरदुःस्थो हतधियः कुतर्कोयं
कांश्चिन्मुखरयति मोहाय जगतः ५ अजन्मानो लोकाः
किमवयववंतोपि जगतामधिष्ठातारं किंभवविधिरनादृ

न् अमी भूर्भुवः प्रभृतयः सप्तलोकाः अवयववंतोपि किं अजन्मा
नः एषां जन्म न विद्यते यत्सावयववत्वं तज्जन्मवत्वं यथा घटस्तथा
लोकाः सावयवाः सावयवत्वात् जन्मवंत एव हे भगवन् भववि
धिस्सृष्टिविधानं जगतामधिष्ठातारं चेतनं निमित्तकारणं ईश्व

© Dharmartha Trust. Digitized by eGangotri

म०टी० रंकिंअनादृत्यअनपेक्ष्यभवतिनैवंकर्त्तारंअपेक्षतएवयदिकाल
५ धर्म्माधर्म्मपरमाणप्रभृतीनिचेतनाभून्यानिचेतनानाधिष्ठा
5 तुःस्वीकृतानिस्वकार्योत्पत्तौप्रवर्त्तंतेयत्चेतनाभून्यंतत्चेतनना
धिष्ठानस्वीकृतंकार्य्योत्पत्तौप्रवर्त्ततेवायदिअनीशःकुर्यात्मह
त्तर्हिभवतंकश्चित्कुर्यात्तदानवस्थाऽनीशस्यभुवनजननेभुवनो

अनीशोवाकुर्याद्भुवनजननेकःपरिकरोय
तोमंदास्त्वांप्रत्यमरवरसंशेरतइमे ६ ॥

त्पादनविधौकःपरिकरःकासामग्रीहेअमरवरयतःकारणा
त्इमेमंदाःपापिष्टाःत्वांप्रतिसंशेरतेसंदेहंकुर्वंतित्वांप्रतिसंशा
योनास्तीतितात्पर्यार्थः ६ त्रयीसांख्यमिति त्रयीवेदविहि
तोमार्गःसांख्यंकापिलंशास्त्रंपंचविंशतितत्त्वोपलक्षितंयत शिव
थायोगःसंयोगःसमवायःविशेषणविशेष्यभावइतिसंयुक्त ५

© Dharmartha Trust. Digitized by eGangotri

समवायःसंबंधः तस्य प्रधानत्वात् न्यायशास्त्रं वैशेषिकशास्त्रं
तथापाशुपतिमतशब्देनसिद्धांताः प्रकीर्तिताः सोमसिद्धांतः
चंद्रसिद्धांतः शिवसिद्धांतः कुलसिद्धांतः पंचार्थसिद्धांतः इत्या
दयः तथा वैष्णवं केशवपंचरात्रनारदपंचरात्रयोगरूपं इतिशा
स्त्रः समाप्तो वर्त्तते एतत्पंचसंख्यापरिछिन्नं प्रस्थाने एतस्मि
त्रयी सांख्यं योगः पशुपतिमतं वैष्णवमिति प्रभिन्ने प्र ७
स्थाने परमिदमदः पथ्यमिति च रुचीनां वैचित्र्यादृजुकु
टिलनानापथजुषां नृणामेको गम्यस्त्वमसि पयसामर्णव इव
प्रस्थाने प्रभिन्ने सति पथ्य कुमार्गे सति अहंकारोपेतास्तदनुया
यिनः इति ब्रुवते यदिदं परमं तत्त्वं अभिन्नं परमार्थतः तदेवरुचि
वैचित्र्यान्नानात्वं समुपागतं हे भगवन् ऋजुकुटिलनानापथ
जुषां कोमलवक्रनानामार्गसेविनां नृणां एकस्त्वमेव गम्यो

© Dharmartha Trust. Digitized by eGangotri

म·टी· सिकइवअर्णोवइवयथाऋजुकुटिलनानापथजुषांपयसामर्ण
६ वोइर्णवोगम्यस्त्वथात्वं ७ महोक्षइति हेवरदयत्तवतंत्रोप
6 करणंमात्रापरिच्छन्नगृहतंत्रंइतियत् किंमहान्उक्षाःवृष
भोयस्यसःमहोक्षः खट्वांगंप्रसिद्धमेवतत् अथवादंडस्योपरि
महोक्षःखट्वांगंपरशुरजिनंभस्मफणिनःकपालंचेतीय
त्तववरदतंत्रोपकरणं सुरास्तांतामृद्धिंदधतितुभवद्भ्रू
प्रणिहितांनहिस्वात्मारामंविषयमृगतृष्णाभ्रमयति ८
ब्रह्मकपालंखट्वांगमुच्यते तथापरशुआयुधअविशेषःअ
जिनंगजचर्मतथाभस्मदग्धगोमयंतथाफणिनःसर्प्पाःका
द्रवेयाः तथाकपालंचइतिसमासोवर्त्तते तुपुनःसुरादेवाभ
वद्भ्रूप्रणिहितांभवद्भ्रूक्षेपोपनीतांअनिर्वचनीयांऋद्धिंदध शिव
तिधारयंति अहंयद्येवंतर्हिस्वयंकस्मान्नभुंक्तेनैवंवाच्यंहि ६

© Dharmartha Trust. Digitized by eGangotri

यस्मात्कारणात् विषयसंगत्यक्त्वा त्मारामंपुरुषंपरमयो।
गिनंनभ्रमयतिनचालयतिएतेनभगवतःपरमयोगित्वंप्रक
टितं ८ एवमिति हेपुरमथनकश्चिद्ध्रुवदर्शीनानुयायीसक
लंसमस्तंजगदिदंएवंगदतिअविनश्वरंकथयति अथपरो
वाभट्टःक्षणभंगवादीसकलंजगदिदंअध्रुवंक्षणिकंगदति।
एवंकश्चित्सर्वंसकलमपरस्त्वध्रुवमिदंपरोध्रौव्याध्रौ
व्येजगतिगदतिव्यस्तविषये समस्तेप्येतस्मिन्पुरमथन
तैर्विस्मितस्त्वस्तुवंजिह्रेमित्वांनखलुननुधृष्टामुखरता ९
अथपरोऽन्यःक्षपणिकःवीतरागीयोद्धादंभात्क्षणभंगवादीस
कलंजगदिदंक्षणिकंगदतिश्रुतेअथपरोन्यःक्षपणकःवीत
रागीसकलंसमस्तंजगदिदंध्रौव्याध्रौव्येगदतिहेभगवन्एवा
स्मिन्समस्तेजगतिव्यस्तविषये--विवक्षितप्रमाणेसत्यांअ

© Dharmartha Trust. Digitized by eGangotri

म॰टी॰ हंतेर्भेदैर्वैदृश्यादिभिर्विस्मितइवविस्मयोत्पन्नोमोहमापितस्त्वां
७ स्तुवन्जिह्रेमिलज्जांकरोमिअहोयद्येवंतर्हिकथंस्तुतोवर्तते
7 सत्यंखलुनिश्चयेनमुखरतावाचालतानधृष्टाअपितुधृष्टे
व ९ तवैश्वर्यमिति हेभगवन्विरिंचिर्ब्रह्माउपरितनपक्षेह
रिःकृष्णोऽधःपक्षेतवैश्वर्यंयत्नात्परिछेत्तुंपरिकलयितुंपरि
तवैश्वर्यंयत्नाद्यदुपरिविरिंचिर्हरिरधःपरिछेत्तुंयातावः
नलमनिलस्कंधवपुषः ततोभक्तिश्रद्धाभरगुरुगृणद्भ्यां
माणेकर्त्तुंनाऽलंजातौअसमर्थौभूतौकथंभूतस्यतवअनिल
स्कंधवपुषःअनेनकिमुक्तंवायुतत्वपर्यंतलिंगस्यमस्तकं
कैलासिपर्यंतलिंगस्यमूलंब्रह्माचब्रह्माण्डव्याप्तिःविष्णुर्भग
वान्अपतत्वानिवासिनीकथमेतौनवैश्वर्यंपरिज्ञातुंसमर्थौ शिव
स्यातांइतिअपितुनभवतइत्यर्थः ततोनंतरंतेनभगवताता ७

© Dharmartha Trust. Digitized by eGangotri

भ्यां ब्रह्माविष्णुभ्यां स्वयंतस्थे आत्मानं आत्मनैव प्रकटयामा
स किं कुर्वन् ध्यानं भक्तिश्रद्धाभरगुरु एवं यथा गणाध्याय यस्मा
त्कारणात् भगवान्कारुणीकृत्वा स्वयं तस्थे आत्मानं आत्मने
व प्रकटयामास हे गिरित्रायु क्तमेतत् अनुवृत्तिस्तव सेवा किं न
फलति अपि तु फलत्येवेत्यर्थः संगच्छति १० अयत्नादिति।
गिरित्राय त्वय्यंतस्थे ताभ्यां तव किमनुवृत्तिर्न फलति॥
१० अयत्नादासाद्य त्रिभुवनमवैरिव्यतिकरं दशास्यो य
द्बाहून्भृतरणकंडूपरवशान् शिरःपद्मश्रेणीरचित
हे भगवन् दशास्यो रावणः बाहून्भृत त्यान् कथंभूतान् बाहून्
रणकंडूपरवशान् संग्राममव्यपातीत्यर्थः किं कृत्वा अवैरिव्य
तिकरं निःकंटकं त्रिभुवनं अयत्नादासाद्य प्राप्य हे त्रिपुरहर द्
दं तत् स्थिरायास्त्वद्भक्तेः शिरःपद्मश्रेणीरचितचरणांभोरु

© Dharmartha Trust. Digitized by eGangotri

म.टी. हवलेः शिरांस्येवपद्मानितेषांश्रेणीपंक्तिस्तयारचितारो
८ पिताचरणांभोरुहाणांबलिःपूजोपहारोयस्यांसाशिरःप
४ द्मश्रेणीरचितचरणांभोरुहबलिस्तस्याःस्फूर्जितंमहिमा॥
११ अमुष्येति हेभगवन् अमुष्यरावणस्यत्वदधिवसतौकै
लासेपिभुजवनंविक्रमयतःपातालेऽपिप्रतिष्ठाअलभ्याआ
चरणांभोरुहवलेःस्थिरायस्त्वद्भक्तेस्त्रिपुरहरविस्फूर्जि
तमिदं ११ अमुष्यत्वत्सेवासमधिगतसारंभुजवनंब
लात्कैलासेपित्वदधिवसतौविक्रमयतः अलभ्यापाता
सीत् अप्राप्याबभूव कस्मात् बलात् कथंभूतंभुजवनंत्वत्से
वासमधिगतसारंप्राप्तबलंकस्मिन्सतित्वयिअलसचलितांगु
ष्ठेशिरसिसतिमंदचलितांगुष्ठाग्रेसति अहोयुक्तमेतत्ख शिव
वंनिश्चितंखलोजनःउपचितःपरयालक्ष्म्याअलंकृतःस ८

© Dharmartha Trust. Digitized by eGangotri

न मुह्यति मोहमुपगच्छति १२ न तच्चित्रमिति हे वरद बाणः।
बाणासुरः सुत्राम्णः इंद्रस्य ऋद्धिं अधः चक्रे कथंभूतः परमो
चैरपि संतीं अत्यंतमहतीमपि हे भगवन् तस्मिन्बाणे तन्नचि
त्रं आश्चर्यं न कथंभूतो बाणः परिजनविधेयत्रिभुवनः एत
लेप्यलसचलितांगुष्ठशिरसि प्रतिष्ठात्वय्यासीध्रुवमु
पचितो मुह्यति खलः १२ यदृद्धिं सुत्राम्णो वरदपरमो
च्चैरपि सतिमधश्चक्रे बाणः परिजनविधेयत्रिभुवनः
न तच्चित्रं तस्मिन्वरिवसितरि त्वच्चरणयोर्न कस्याप्यु
न्नत्यै भवति शिरसस्त्वय्यवनतिः १३
द्विजोपणं प्रथमं देयं पश्चादिति कथंभूते बाणे त्वच्चरणयोर्वरि
वसितरि पूजयितरि हे भगवन् युक्तमेतत् त्वयि शिरसा अवन
तिर्नम्रता कस्यापि उन्नत्यै न भवति अपितु सर्वेषामेव ऐश्वर्याय

म॰टी॰ हे त्रिनयन नयः कल्माषः कृष्णपांडुरो वर्णः कृत्स्नं विषं संहृतव
९ र्तः तव कंठे आसीत् स तव कंठे श्रियं न कुरुते अपि तु करोत्ये
९ व कथंभूतस्य तव अकांडब्रह्मांडक्षयचकितदेवासरकृपा ।
विधेयस्य अकांडे अप्रस्तावे ब्रह्मांडक्षयेन जगत्प्रलयेन च

अकांडब्रह्मांडक्षयचकितदेवासुरकृपाविधेयस्यासी
द्यस्त्रिनयन विषं संहृतवतः स कल्माषः कंठे तव न कु
रुते न श्रियमहो विकारोपि श्लाघ्यो भुवनभयभंगव्यस
निनः १४ असिद्धार्था नैव क्वचिदपि सदेवासुरनरे

किना देवाः सुरास्तेषु कृपा विधेयो कृपापरो यस्तस्य अहो युक्त
मेतत् भुवनभयभंगव्यसनिनः पुरुषस्य विकारोपि हि श्लाघ्यः १४
हे भगवन् यस्य स्मरस्य विशिखाः बाणाः सदेवासुरनरे निवर्तं शिव
ते जगति असिद्धार्थाः प्रकृतप्रयोजनाः क्वचिदपि नैव निवर्तंते ९

© Dharmartha Trust. Digitized by eGangotri

सःस्मरःसोऽन्नरसुरसाधारणंयथाभवति तथाअन्यदेवतु
त्वंपश्यन्स्मर्त्तव्यात्माऽभूत् स्मरणीयशरीरोऽभूत् कथंभू
ताःविशिखाःनित्यंजयिनःजयनशीलाः यद्वाजययुक्ताःअहो
युक्तमेतत् वशिषुजितेंद्रियेषुपरिभवोनपथ्यःनहितकारीत्य
निवर्त्ततेनित्यंजगतिजयिनोयस्यविशिखाः सपश्यन्नी
शत्वामितरसुरसाधारणमभूत्स्मरःस्मर्त्तव्यात्मानहिवशि
षुपथ्यःपरिभवः १५ महीपादाघाताद्व्रजतिसहसासं
शयपदंपदंविष्णोर्भ्राम्यद्भुजपरिघरुग्नग्रहगणं ॥
र्थः १५ महीपादाघातादिति हेभगवन् त्वंजगद्रक्षायैनटसि।
नटत्वंकरोतिमहीपादाघातात् पादक्षेपात् चरणविन्यासात्
सहसासंशयपदंव्रजतिकिंभुज्यतिकिंअधःप्रविशतिइति
संशयपदंतथाविष्णोःपदंआकाशंभ्राम्यद्भुजपरिघरुग्न

© Dharmartha Trust. Digitized by eGangotri

 ग्रहगणं वर्त्तते भ्राम्यद्भुजपरिघैरुग्नो भग्नो ग्रहसमूहं वर्त्तते
 तथा द्यौः स्वर्गः मुहुर्मुहुर्वारं वारं दौस्थ्यं याति दुःखं नीयाति कथं
 भूता द्यौः अनिभृतजटाताडिततटा नत्विहो युक्तमेतत् यतो विभु
त्वामेव वैपरीत्यं विभुत्वं १६ वियद्व्यापीति हे भगवन् यः वा

मुहुर्द्यौर्दौस्थ्यं यात्यनिभृतजटाताडिततटा जगद्रक्षायै त्वं न
टसि ननु वामैव विभुता १६ वियद्व्यापी तारागणगुणित
फेनोद्गमरुचिः प्रवाहो वारां यः पृषतलघुदृष्टः शिरसि ते ॥
जगद्द्वीपाकारं जलधिवलयं तेन कृतमित्यनेनैवोन्नेयं धृ
तमहिमा दिव्यं तव वपुः १७

वां पानीयानां प्रवाहः स ते तव शिरसि पृषतलघुदृष्टः जलकणि
कावत्सूक्ष्मो दृष्टः कथंभूतः वियद्व्यापी व्योमप्राच्छादनशीलः पु
नः कथंभूतः तारागणगुणितफेनोद्गमरुचिः ताराः नक्षत्राणि

© Dharmartha Trust. Digitized by eGangotri

तेषांगणः समूहः तेनगुणिताउपमितापेनोद्गमस्यरुचिर्यस्यसः
तेनप्रवाहेनजगद्द्वीपाकारंजलधिवलयंकृतंसमुद्रपरिखंचकृ
तं हे घनमहिमअमुनाप्रकारेणअनेनैवदृष्टांतेनतवयपुःउन्ने
यंअनुमेयंउपमेयंकथंभूतंदिव्यंदिव्यप्रभावयुक्तं १७ रथःक्षो
णीति हे भगवन् तेतवत्रिपुरतृणंदिधक्षोःअयंकःआडंबरविधिः
रथःक्षोणीयंताशतधृतिरगेंद्रोधनुरथोरथांगेचंद्रार्कौर
थचरणपाणिःशरइति दिधक्षोस्तेकोयंत्रिपुरतृणमा
डंबरविधिर्विधेयैःक्रीडंत्योनखलुपरतंत्राःप्रभुधियः १८
इयंकासामग्रीइतीतिकिंक्षोणीपृथ्वीरथःयंताशतधृतिःब्र
ह्माअगेंद्रोपर्वतराजोहिमाचलोधनुःअथानंतरंरथांगेचक्र
स्थानेचंद्रार्कौतथारथचरणपाणिर्विष्णुःशरःपात्योद्वितीय
पक्षेअहोयुक्तमेतत्खलुनिश्चयेनप्रभुधियःस्वामीबुद्धयः

© Dharmartha Trust. Digitized by eGangotri

म॰टी॰ विधेयैःपदातिभिःसार्द्धंक्रीडंत्यःनपरतंत्राःनपरायत्ताःस्वा
११ धीनाइत्यर्थःप्रभुर्यदिच्छतितत्करोतीतितात्पर्यार्थः १८ हरि
॥ स्तेइति हेभगवन्‌हरिःकृष्णःतेतवपादयोःसाहस्रंकमलब
लिंआधायनिक्षिप्यतस्मिन्साहस्रेएकोनेसतिनिजंनेत्रक
मलंउदहरन्‌उत्पाटितवान्‌असौभक्त्युद्रेकःपरिणतिगतास
हरिस्तेसाहस्रंकमलबलिमाधायपदयोर्यदेकोनेतस्मि
न्निजमुदहरंनेत्रकमलं गतोभक्त्युद्रेकःपरिणतिमसौ
चक्रवपुषात्रयाणांरक्षायैत्रिपुरहरजागर्त्तिजगतां १९
न्‌त्रयाणांजगतांरक्षायैजागर्त्तिस्फुरतिकेनचक्रवपुषाचक्रश
रीरेण १९ हेभगवन्‌जनोलोकःअतःकारणात्कर्म्मसुवि
षयेदृढपरिकरोदृढारंभोवर्त्ततेकिंकृत्वाक्रतौवेदश्रद्धांबद्धापु शिव
नःकिंकृत्वात्वांक्रतुषुयागेषुफलदानप्रतिभुवंसंप्रेक्ष्य क्रतौ ११

© Dharmartha Trust. Digitized by eGangotri

यागेसुप्तेविनष्टेसतिफलयोगेफलसंबंधेत्वंजाग्रदसित्वमेवसा
वधानोभवसिक्रतुयागयाजिनांपुरुषाणांप्रध्वस्तंप्रनष्टंकर्म
पुरुषाराधनमृतेविनाक्वफलतिअपितुनफलतीत्यर्थः २० ॥
क्रियादक्षेति हेशरणदहेअभयददक्षोमुनिःक्रियादक्षःक्रियायां
क्रतौसुप्तेजाग्रत्त्वमसिफलयोगेक्रतुमतांक्वकर्मप्रध्वस्तंफ
लतिपुरुषाराधनमृते अतस्त्वांसंप्रेक्ष्यक्रतुषुफलदानप्र
तिभुवंश्रुतौश्रद्धांबद्धादृढपरिकरःकर्मसुजनः २० क्रिया
दक्षोदक्षःक्रतुपतिरधीशस्तनुभृतामृषीणामार्त्विज्यंशर
णदसदस्याःसुरगणाः क्रतुभ्रंशस्त्वत्तःक्रतुषुफलदान
कुशलःतथाक्रतुपतिःतनुभृतांप्राणिनांअधीशःतथाऋषीणां
आर्त्विज्यंऋत्विग्भावस्तथासुरगणादेवसमूहाःसदस्याःसभ्याः
श्री एवंसामग्रीकस्यदक्षस्यत्वत्तस्त्वत्सकाशात्क्रतुभ्रंशोयागविनाशो

© Dharmartha Trust. Digitized by eGangotri

म०टी० वंभूतं कथंभूतात्त्वत्तः क्रतुषु फलदानव्यसनिनो हि यस्मात्कारणात्
१२ ध्रुवं निश्चितं मखाः यागाः कर्तुर्यजमानस्य श्रद्धाविधुरं श्रद्धया
12 हीनं अभिचाराय भवंति विपरीतार्थाः भवंति २१ प्रजानाथमिति॥
हे नाथ हे स्वामिन् ते तव मृगव्याधरभसः आखेटकोत्साहः अमुं अ
व्यसनिनो ध्रुवं कर्तुः श्रद्धाविधुरमभिचाराय हि मखाः २१
प्रजानाथं नाथ प्रसभमभिकं स्वां दुहितरं गतं रोहिद्भूतां रिर
मयिषुमृष्यस्य वपुषा धनुष्पाणेर्यातं दिवमपि सपत्राकृ
तममुं त्रसंतं तेऽद्यापि त्यजति न मृगव्याधरभसः २२ ॥
भिकं कामुकं अपरं कथंभूतं सपत्राकृतं बाणभित्वात्तकथितं अ
परं कथंभूतं त्रसंतं दिवमपि यातं यद्यपि प्रजानाथं ब्रह्माणं अद्या
पि न त्यजति कथंभूतस्य तव धनुष्पाणेः कथंभूतं प्रजानाथं प्रस शिव
भं बलात्कारेण रोहिद्भूतां रोहिणीभूतां स्वां दुहितरं ऋक्षस्य वपुषा १२

© Dharmartha Trust. Digitized by eGangotri

मृगशरीरेणागतं किं कर्त्तुमिच्छुं रिरमयिषुं रमयितुमिच्छुं कथंभू
तं अद्यापि त्रसंतं त्रसंतं दिवमपि स्वर्गेपि गतं पुनस्तेतवत्तथापि।
मृगव्याधरभसः अद्यापि प्रजानाथं न त्यजतीत्यर्थः २२. स्वलाव
ण्येति हे पुरमथन त्रिपुरदाहकर तथापि देवी पार्वती त्वां स्त्रैणं
अवैति जानाति किं कृत्वा यद्यपि पुष्पायुधं कंदर्प्पं पुरोऽग्रेऽन्हा

स्वलावण्याशंसा धृतधनुषमह्नाय तृणवत्पुरः प्लुष्टं दृष्ट्वा
पुरमथन पुष्पायुधमपि यदि स्त्रैणं देवी यमनिरतदेहा
र्धघटनादवैति त्वामद्धा वत वरद मुग्धा युवतयः २३ ॥

यस्मतीत तृणवत् प्लुष्टं दग्धं दृष्ट्वापि कस्मात् यमनिरतदेहार्धे
घटनात् अर्धनारीशरीरसंपादनात् कथंभूता देवी स्वलावण्या
शंसा स्वस्वरूपाभिमानिनी अहो वत इति खेदे अद्धा निश्चितं हे
वरद मुग्धा युवतयः स्त्रियः अज्ञानाः संति २३. स्मशानेति।

© Dharmartha Trust. Digitized by eGangotri

म॰टी॰ हे स्मरहर तव स्मशानेषु आसमंताद्भावेन क्रीडा तथा पिशाचाः स
१३ हचराः नित्यं क्रिडाकारिणः तथा चिताभस्मना अंगरागः चिता
13 भस्मालेपः तथा स्रगपि माला नृकरोटीपरिकरः नाम इति संबो
धने हे वरद एवं पूर्वोक्त प्रकारं अखिलं समग्रं तव शीलं अमंग
ल्यं भवतु पुनस्तथापि स्मर्तॄणां चिंतकानां परमं मंगलमसि॥

स्मशानेष्वाक्रीडा स्मरहर पिशाचाः सहचराश्चिताभस्मा
लेपः स्रगपि नृकरोटीपरिकरः अमंगल्यं शीलं तव भवतु
नामैवमखिलं तथापि स्मर्तॄणां वरद परमं मंगलमसि २४

तथोक्तं च सुभाषितद्वारेण श्यामतां वहति याति करीषं यात्यकं।
विभवं हरतां यात तद्दौ किमपि वा रिस्थिरस्तु प्रीणता नियतयेन
जगति २४ मनः प्रत्येति हे भगवन् यमिनो योगिनः मानोंऽतः शिव
करणं चित्ते स्वात्मनि सविधं अभिधाय समीत्यं रूवाप्रत्यक्य। १३

© Dharmartha Trust. Digitized by eGangotri

ह्लादं तमंध्ये यत्किमपि अनिर्वचनीयं तत्त्वं आलोक्य अह्लादं
दधति धारयंति किल इति सत्येतद्भवान् कथंभूताः यमिनः
आत्तमरुतः आत्तो गृहीतो मरुद्वायुर्यैस्ते पुनः कथंभूताः प्रहृ
ष्यद्रोमाणः सरोमांचगात्राः अपरं कथंभूताः प्रमदसलिलो
त्संगितदृशः प्रमदसलिलानि हर्षाश्रूणि तैरुत्संगिना परिपू
मनः प्रत्यक्चित्ते सविधमविधाया आत्तमरुतः प्रहृष्यद्रो
माणः प्रमदसलिलोत्संगितदृशः यदालोक्याह्लादं ह्रद इव
निमज्यामृतमये दधत्यंतस्तत्त्वं किमपि यमिनस्तत्किल भवा
ताहृष्टिर्येषां ते तथोक्ताः उत्प्रेक्षते अमृतमये ह्रदे निमज्ज्येवा
ह्लादं धारयंति यथा कश्चित्तापाक्रांतो अमृतमये सुशीतले
ह्रदे सरसि निमज्ज्य आह्लादमानंदं दधाति इत्यर्थे संगतिः २५
त्वमर्कैति हे भगवन् त्वं अर्कः सूर्यः त्वं सोमश्चंद्रः त्वं पवनो वा

© Dharmartha Trust. Digitized by eGangotri

म॰टी॰ युरसि त्वं हुतवहः अग्निरसि त्वमापः पानीयमसि त्वं व्योम आ
१४ काशः त्वमु धरणिरात्मा त्वमिति च इति शब्दः समाप्तौ वर्त
15 ते हे भगवन् परिणताः परिपक्वबुद्धयः त्वयि विषये एवं पूर्वो
क्तप्रकारेण परिछिन्नां इत्थं त्वा धारितां दयता कलितां गिरं ।
बिभ्रतु तु पुनः इह जगति वयं तत्तत्त्वं न विद्मः यत्त्वं त्वं न भव
त्वमर्कस्त्वं सोमस्त्वमसि पवनस्त्वं हुतवहस्त्वमापस्त्वं व्यो
म त्वमु धरणिरात्मा त्वमिति च परिछिन्नामेवं त्वयि परिण
ता बिभ्रतु गिरं न विद्मस्तत्तत्त्वं वयमिह हि यत्त्वं न भवसि २६
सि यत्किंचित्सदसद्वा तत्सर्वं भगवानिति भगवद्व्यतिरिक्तं किं
चिन्नास्तीति तात्पर्यार्थः २६ त्रयीमिति हे शरणद ओं इति प
दं त्वां गृणाति स्तौति कथंभूतं ओं त्वां समस्तव्यस्तं समस्तव्याप शिव
कं किं कुर्वन् ॐ इति पदं त्रयी वेदत्रयी अभिदधत् न केवलांत्र १४

© Dharmartha Trust. Digitized by eGangotri

यीति स्रो वृत्तिभ्यः उदात्तानुदात्तसमाहारभेदात् नकेवलास्ति
स्रो वृत्ती त्रिभुवनं च स्वर्गमर्त्यपातालं च पुनः किं कुर्वन् अका
राद्यैः अकारोकारमकारैस्त्रिभिर्वर्णैः त्रीनपि सुरान् ब्रह्मवि
ष्णुरुद्रानभिदधत् किं कुर्वाणः ओं इति पदं अणुभिर्ध्वनिभि
स्तेन यत्तुरीयं चतुर्थं धाम अवरुंधानं स्वीकुर्वन् किमपेक्ष्य या

त्रयीति स्रो वृत्ती स्त्रिभुवमथो त्रीनपि सुरानकाराद्यैर्वर्णै
स्त्रिभिरभिदधत्ती र्णाविकृतिः तुरीयं ते धाम ध्वनिभिर २
वरुंधानमणुभिः समस्तं व्यस्तं त्वां शरणद गृणात्योमिति पदं

तुरीयं च धामेति हृदयात् कंठं यावज्जाग्रदवस्थायाः व्याप्तिः कं
ठात्तालुपर्यंतं स्वप्नावस्थायाः व्याप्तिः तालुआदि ललाटपर्यंतं
सुषुप्तावस्थाया व्याप्तिः ललाटाद्यं कुंडलिनी व्याप्य शिवतत्वं
यावत्तुर्यावस्थाव्यावर्त्तयेत तत्र अनाहतो नादो मुक्तिदः परकी

© Dharmartha Trust. Digitized by eGangotri

म०टी० त्तिनः कथंभूतं तेतवतुरीयं धामतीर्णविकृतिः तीर्णाः परित्यक्ताः
१५ विकारादयो येन तत्तीर्णविकृतिः निर्विकारइत्यर्थः २७ भवइ
ति हे भगवन् हे देव यदिदं तवाभिधानाष्टकं अमुष्मिन्नभिधानां
ष्टके श्रुतिर्वेदः प्रत्येकं प्रविचरति तत्किमभिधानाष्टकं भवः १
भवः शर्वो रुद्रः पशुपतिरथोग्रः सहमहांस्तथा भीमेशानावि
ति यदभिधानाष्टकमिदं अमुष्मिन्प्रत्येकं प्रविचरति देवःश्रु
तिरपि प्रियायास्मै धाम्ने प्रणिहितनमस्योस्मि भवते २८॥
शर्वः २ रुद्रः ३ पशुपतिः ४ उग्रः ५ सहमहान् ६ भीमः ७ ईशानो ८
शब्देन धाम्ने प्रियाय प्रीत्यर्थं हे भगवन् एवंरूपाय भगवते तु
भ्यं प्रणिहितनमस्योस्मि कृतनमस्कारोस्मि २८ हे प्रियदव अ
भक्तानां प्रियं दनोतिइति प्रियदव ते तुभ्यं नमः नेदिष्ठाय निकट शिव
वर्त्तिने नमः दविष्ठाय च नमः दूरस्थाय नमः हे स्मरहर ते तुभ्यं क्षो १५

© Dharmartha Trust. Digitized by eGangotri

दिष्टायनमः क्षुद्रतरायसूक्ष्मतरायमहिष्ठायमहत्तमायगुरुत्त
मायचनमः हेत्रिनयनतुभ्यंवर्षिष्ठायचनमः वृद्धरूपायतथाय
विष्ठाययुवारूपायहेभगवन्तुभ्यंसर्वस्मैसर्वत्रकारणायनमः
तदितिवाक्योपसंहारेतुभ्यंसर्वायचनमः २९ बहुलरजसेति
नमोनेदिष्टायप्रियदवदविष्ठायचनमः नमःक्षोदिष्टायस्म
रहरमहिष्ठायचनमः नमोवर्षिष्ठायत्रिनयनयविष्ठायच
नमोनमःसर्वस्मैतेतदिदमितिसर्वायचनमः २९ बहुल
रजसेविश्वोत्पत्तौभवायनमोनमः प्रबलतमसेतत्संहारे
हेभगवन्विश्वोत्पत्तौबहुलरजसेप्रचुररजोधिष्ठानायभवाय
नमः तत्संहारेप्रबलतमसेप्रबलतमोगुणायहरायनमोनमः
सुखकृतेजनानांसुखकारणायसत्वोत्पत्तौसत्वगुणाधिष्ठा
त्रेमृडायनमोनमः निस्त्रैगुण्येगुणत्रयातीतायप्रमहसिपदे

© Dharmartha Trust. Digitized by eGangotri

म॰टी॰ मुक्तिस्थाने शिवायनमोनमः ३० कृशपरिणतीति हे भगवन्
१६ भक्तिर्मा इत्यमुनाप्रकारेण चकितं भीतं असंदीकृत्य प्रोत्साद्यते
16 तव चरणयोर्वाक्यपुष्पोपहारं आधात् रचितं इति किं इदं ते चेतः
कश्राभ्यद्दृष्टिः कथंभूतं चेतः कृशपरिणतिपरिणामदुर्वलं

हरायनमोनमः जनसुखकृते सत्वोद्रिक्तौ मृडायनमोन
मः प्रमहसिपदे निस्त्रैगुण्ये शिवायनमोनमः ३० कृश
परिणतिचेतः क्लेशावश्यं क्वचेदं क्व च तव गुणसीमोल्लंघि
नी शश्वदृद्धिः इतिचकितममंदीकृत्य मां भक्तिराधाद्वर
दचरणयोस्ते वाक्यपुष्पोपहारं ३१ ॥ ॥

पुनः कथंभूतं क्लेशावश्यं अविद्याअस्मितारागद्वेषाभिनिवेशाः
पंचक्लेशास्तेषां वश्यं क्लेशावश्यं विपरीतज्ञानं अविद्या भिन्न शिव
योर्बुद्ध्यात्मनोरेकत्रप्रतीतिरस्मिता सुखेष्वाशक्ती रागः दुः १६

© Dharmartha Trust. Digitized by eGangotri

खेषुप्रीतिर्द्वेषः अननुभूतादपि मरणादेस्त्रासोऽभिनिवे
शाः इति क्लेशाः कथंभूतास्त्रिभिः गुणैस्त्रिमोक्षं धनी गुण
त्रयातीता ३१ असितेति हे वरद यदि असितगिरिसमं अं
जनगिरिसमं कज्जलं स्यात् सुरतरुवराणां कल्पवृक्षादी

असितगिरिसमंस्यात्कज्जलंसिंधुपात्रे सुरतरुवर
शाखालेखनी पत्रमुर्वी लिखति यदि गृहीत्वा शार
दा सर्वकालं तदपि तव गुणानामीश पारं न याति ३२

नां शाखा लेखनी स्यात् यदि शारदा देवी सरस्वती उर्वी पृ
थ्वीपत्रं गृहीत्वा सर्वकालं लिखति तदपि तव गुणानां पारं
न यातीत्यर्थः ३२॥ ॥

असुरसुरमुनीन्द्रैरर्चितस्येन्दुमौले ग्रंथितगुणमहिम्नो निर्गु
णस्येश्वरस्य सकलगुणवरिष्ठः पुष्पदंताभिधानो रुचिरम

म॰टी॰ लघुवृत्तैस्तोत्रमेतच्चकार ३३ अहरहरनवद्यं धूर्जटेः स्तोत्रमे
१७ तत्पठति परमभक्त्या शुद्धचित्तः पुमान्यः स भवति शिवलोके
17 रुद्रतुल्यः सदात्मा प्रचुरतरधनायुः पुत्रवान्कीर्तिमांश्च ३४
दीक्षादानंतपस्तीर्थंहोमयागादिकाः क्रियाः महिम्नस्तवपाठ
स्यकलांनार्हंतिषोडशीं ३५ समाप्तोयंसमेस्तोत्रंसर्वमीश्वर
वर्णनं अनूपमंमनोहारीपुण्यंगंधर्वभाषितं ३६ महेशान्नाप
रोदेवोमहिम्नोनापरास्तुतिः अघोरान्नापरोमंत्रोनास्तितत्वंगु
रोःपरं ३७ कुसुमदशननामासर्वगंधर्वराजः शशिधरवर
मौलेर्देवदेवस्यदासः सगुरुनिजमहिम्नोभ्रष्टएवास्यरोषा
त्स्तवनमिदमकार्षीद्दिव्यदिव्यंमहिम्नः ३८ सुरवरमुनिपूज्यं
स्वर्गमोक्षैकहेतुंपठतियदिमनुष्यःप्रांजलिर्नान्यचेताः व्रज शिव
तिशिवसमीपंकिन्नरैःस्तूयमानःस्तवनमिदममोघंपुष्पदंत १७

© Dharmartha Trust. Digitized by eGangotri

म॰री॰ प्रलीतं ३९ श्रीपुष्पदंतमुखपंकजनिर्गतेन स्तोत्रेणकिल्बि
१८ षहरेणहरप्रियेण कंठस्थितेनपठितेनसमाहितेनसुप्रीणि
तोभवतिभूतपतिर्महेशः ४० इतिश्रीपुष्पदंताचार्यविरचि
18 तंशिवमहिम्नः टीकास्तोत्रसंपूर्णं शुभंभवतु श्रीरस्तु॥ ॥
मंगलंभगवान्विष्णुर्मंगलंगरुडध्वजः मंगलंपुंडरीकाक्षंमंग
लायतनोहरिः १ ॐनमःशिवाय ॥

शिव
१८

© Dharmartha Trust. Digitized by eGangotri

© Dharmartha Trust. Digitized by eGangotri

© Dharmartha Trust. Digitized by eGangotri

© Dharmartha Trust. Digitized by eGangotri